## अनुदात्तस्य च यत्रोदात्तलोपः । (१६१/३६६१)

उदात्तः इति वर्तते । यस्मिन्ननुदात्ते परतः उदात्तो लुप्यते तस्यानुदात्तस्या[1]दिरुदात्तो भवति । [2]कुमार ई कुमारी । कुमारशब्दोऽन्तोदात्तः, तस्य ङीप्यनुदात्ते उदात्तो लुप्यते । [3]अनुदात्तो ङीप् उदात्तः । 'भस्य टेर्लोपः' (७.१.८८/३६८) । पथः । पथा । पथे । पथिन्शब्दोऽन्तोदात्तः । कुमुदनडवेतसेभ्यो ड्मतुप् (४.२.८७/१३०६) । कुमुद्वान् । नड्वान् । वेतस्वान् । कुमुदादयोऽन्तोदात्ताः । [4]ड्मतुबनुदात्तः । अनुदात्तस्य इति किम् ? प्रासङ्गं वहति प्रासङ्ग्यः । प्रासङ्गशब्दस्याथादिस्वरेण (६.२.१४४/३८७८) अन्तोदात्तः । तस्य यति तित्स्वरितमिति स्वरिते उदात्तो लुप्यते ? नैतदस्ति, स्वरिते [5]हि विधीयमाने परिशिष्टमनुदात्तम्, तत् कुत उदात्तलोपः । तदेतदनुदात्तग्रहणमादेरनुदात्तस्योदात्तार्थम् । अन्तः इति हि प्रकृतत्वाद[6]न्तस्य स्यात्, मा हि धुक्षाताम्, मा हि धुक्षाथाम् । यत्र इति किम् ? भार्गवः, भार्गवौ, भृगवः । प्राक् सुबुत्पत्तेर्गोत्रप्रत्ययस्य लुक् । उदात्तग्रहणं किम् ? बैदी । और्वी ॥

## धातोः । (१६२/३६७१)

अन्तः इत्येव । धातोरन्त उदात्तो भवति । पचति । पठति । ऊर्णोति । गोपायति । [7]याति ॥

## चितः । (१६३/३७१०)

चितो[8]ऽन्त उदात्तो भवति । 'भञ्जभासमिदो घुरच्' (३.२.१६१/३१४१) भङ्गुरम् । [9]भासुरम् । मेदुरम् । 'आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्' (२.४.७०/११५२) । कुण्डिनाः । चिति प्रत्यये प्रकृतिप्रत्ययसमुदायस्यान्त उदात्त इष्यते । बहुपटुः । उच्चकैः ॥

## तद्धितस्य । (१६४/३७११)

[10]चितः इत्येव । चितस्तद्धितस्यान्त उदात्तो भवति । 'गोत्रे कुञ्जादिभ्यश्च्फञ्' (४.१.९८/१०९९)–कौञ्जायनाः । मौञ्जायनाः । किमर्थमिदम् ? परमपि ञित्स्वरं बाधित्वाऽन्तोदात्तत्वमेव यथा स्यादिति[11] ॥

## कितः । (१६५/३७१२)

[12]तद्धितस्य इत्येव । तद्धितस्य कितोऽन्त उदात्तो भवति । 'नडादिभ्यः फक्' (४.१.९९/११०१)–नाडायनः । चारायणः । 'प्राग्वहतेष्ठक्' (४.४.१/१५४८)–आक्षिकः । शालाकिकः ॥

---

1. आदिः नास्ति फ.ह. 2. कुमार ई नास्ति फ.ह. 3. अनुदात्तौ सुप्पितौ ङीप् अनुदात्तः इत्यधिकम् क. 4. ड्मतुबनुदात्तः नास्ति क. 5. हि नास्ति फ. 6. अनन्त्यस्य न स्यात् ह. 7. याति नास्ति फ. 8. अन्तोदात्तो क.फ. 9. भासुरम् नास्ति ग. 10. वाक्यमिदं नास्ति फ. 11. इति नास्ति फ. 12. वाक्यमिदं नास्ति फ.